# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

Jan - 2012

### प्रथमपत्रिका

दिनाङ्कः - २९-०१-२०१२ अङ्काः-१००

पूर्वाह्ने - १०-०० तः १-०० पर्यन्तम् समयः-३-०० होराः

**1 एकवाक्येन संस्कृते उत्तरं लिखत । (अष्टानामेव)** 8x1=8

१. भोजस्य कस्मिन् महानादरः आसीत् ?

२. अचक्षुषां चक्षुः कः ?

३. रामशुकः कुत्र न्यवसत् ?

४. द्रोणाचार्यस्य प्रसिद्धः शिष्यः कः ?

५. मल्लः कस्य सभाम् आससाद ?

६. शङ्कराचार्यस्य मातापितरौ कौ ?

७. भुजङ्गमः रोषात् किमकरोत् ?

८. अनार्यः कथं पतति ?

९. अमरशक्तेः पुत्राः कीदृशाः आसन् ?

१०. मानवेन नित्यं किम् आलोचनीयम् ?

**2 वक्यद्वयेन संस्कृते उत्तरं लिखत । (पञ्चानामेव)** 5x2=10

१. चित्रग्रीवः कः? स स्वाश्रितान् कथं ररक्ष ?

२. कालटीग्रामः कुत्रास्ति ? शङ्कराचार्यस्य प्रसिद्धाः शिष्याः के ?

३. मल्लः परिकरं बध्वा राजानं किम् उवाच ?

४. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किमचिन्तयत् ?

५. एकलव्यः कः ? स किमर्थं द्रोणस्य समीपम् आगच्छत् ?

६. भूतानां प्रलयोदयौ कौ ?



पश्चादनुवर्तते

3 **संस्कृतभाषया उत्तरं लिखत । (त्रयाणामेव)** 3x3=9

१. वायसेन किमनिष्टं दृष्टम् ? तस्य परिणामं लिखत ।

२. सुमतेः अभिप्रायं विवृणुत ।

३. हनुमान् समुद्रस्योपरि किं किं चकार ? विशदयत ।

४. कौशिकः कीदृशः द्विजः आसीत् ? सः कुत्र वेदाध्ययने रतः आसीत् ?

4 **मातृभाषया उत्तरं लिखत । (त्रयाणामेव)** 3x4=12

१ हनूमान् सीतां कथं समाश्वासयामास ? विवृणुत ।

२. 'ब्राह्मणः सर्पश्च' पाठस्य सारांशं लिखत ।

३. विष्णुशर्मणः प्रतिज्ञा का ? विशदयत ।

४. साधूनां स्वभावं सोदाहरणं विवृणुत ।

5 **ससन्दर्भं स्वोत्तरभाषया लिखत । (चतुर्णाम्)** 4x3=12

१. जरारोगवर्जितो वज्रकायो भविष्यसि ।

२. न हि किञ्चित् गुरवे अदेयम् ।

३. अग्निसदृशाः द्विजाः पृथिवीमपि दहेयुः ।

४. तदेनं हत्वा सर्वमेकवारं ग्रहीष्यामि ।

५ न किञ्चिदर्थेन प्रयोजनम् ।

6 **द्वयोः अन्वयानुसारम् अर्थम् स्वेष्टभाषया लिखत ।** 2x3=6

१. आत्मानमात्मना वेत्सि सृजस्यात्मनमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ।।

२. गते तु रावणे सीतां प्रलपन्तीं स मारुतिः ।
उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ।।

३. अजात-मृत-मूर्खेभ्यो मृताजातौ सुतौ वरम् ।
यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् ।।

**7** **श्लोकद्वयं पूरयत ।** 2×2=4

१. दोर्भियुक्ता ........................................ सुप्रसन्ना ।।

२. राजा घृणी ............................................. वेत्ति ।।

३. यथा कन्दुक ............................................ यथा ।।

**8** **भाषान्तरं कुरुत ।** 5

एकदा भोजः सर्वान् कवीन् आहूय समस्याम् एकां दत्वा अवदत् । यः इमां समस्यां पूरयति सः एव कवीनां चक्रवर्ती भवितुमर्हति इति। सर्वे कवयः प्रयत्नम् अकुर्वन् । परन्तु कालिदासः एव समस्यापरिहारे यशस्वी अभवत् ।

**9** **रिक्तस्थानं पूरयत ।** 4×1=4

१. यादृशं भक्षयेदन्नं .................. भवति तादृशी ।

२. साक्षरा हि ...................... गताः ।

३. स्त्री चात्रपा .................. सहायः ।

४. सुखार्थी ..................... त्यजेत् ।

**10** **समानार्थकपदं लिखत । (त्रयाणामेव)** 3×1=3

१. देवाः २. भुजगः ३. अनुपदम् ४. गृहम्

**11** **विरुद्धार्थकपदं लिखत । (त्रयाणामेव)** 3×1=3

१. हितः २. प्रबुद्धः ३. आद्याय ४. शुभम्

**12** **वाक्यं रचयत । (त्रयाणामेव)** 3×1=3

१. श्रुतः २. उपसृत्य ३. पश्चात् ४. असि

**13** **सर्वपुरुषवचनेषु लिखत । (एकस्य)** 3×1=3

१. निन्दतु २. क्षीयते ३. अयाचत

**14** **सन्धिं विभज्य नाम लिखत । (त्रयाणामेव)** 3×1=3

१. इत्येनाम् २. गिरिरयम् ३. एकदैव ४. जगदीशः

**15** **वाक्यदोषं परिहरत ।** 3×1=3

१. भवान् गच्छ । २. गोपालः गणेशस्य सह अगच्छत् ।

३. वृक्षेण पत्राणि पतन्ति ।

**16** **प्रयोगपरिवर्तनं कुरुत ।** 1×3=3

१. नाहं विद्याविक्रयं करोमि । २. मात्रा क्षीरं दीयते ।

३. छात्रः प्रतिदिनं शालां गच्छति ।

**17** **लोकोक्तिं पूरयित्वा अर्थं मातृभाषया लिखत । (एकस्य)** 1×2=2

१. क्लेशः ............................................ विधत्ते ।

२. चक्रार............................................ भाग्यपङ्क्तिः ।

**18** **संयोज्य लिखत ।** 1×3=3

| अ | ब |
|---|---|
| गवेषयमाणः | अव्ययम् |
| अधीत्य | क्रियापदम् |
| अवातरत् | वर्तमानकृदन्तः |
| | ल्यबन्ताव्ययम् |

**19** **व्याकरण विशेषं लिखत । (एकस्य)** 2×1=2

१. महाराजः २. गच्छति स्म

**20** **कर्तृ-कर्म-क्रियापदं च दर्शयत** 2×1=2

१. राजा भवन्तम् आह्वयति ।

२. पुत्रः फलं खादति ।

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

Jan - 2012 (2)

## द्वितीयपत्रिका

दिनाङ्कः - २९-०१-२०१२ अङ्काः–५०
अपराह्ने - १-३० तः ३-०० पर्यन्तम् समयः–सार्धैकहोरा

**1 अ) दशभिः वाक्यैः संस्कृते प्रबन्धमेकं लिखत ।** 1x5=5

१. शालायाः वार्षिकोत्सवः २. संस्कृतभाषायाः महत्वम् ३. पुस्तकालयः

**2 संस्कृतभाषया पत्रमेकं लिखत ।** 1x5=5

१. अध्ययनविषये पित्रा पुत्राय लिखितं पत्रम् ।
२. दिवद्वयस्य विरामं संप्रार्थ्य कक्षाध्यापकं प्रति लिखितं पत्रम् ।

**3 द्वयोः लक्षणं सोदाहरणम् अङ्ग्लभाषया कर्नाटकभाषया वा लिखत ।** 2x3=6

१. अव्ययानि २. शतृ-शानच्प्रत्ययौ ३. विशेषणम्

**4 क्रियापदस्य रूपाणि पुरुषत्रयेषु लिखत । (द्वयोः)** 2x3=6

१. गमिष्यति २. अमोदत ३. वदतु

**5 एकं शब्दं सर्वेषु विभक्तिवचनेषु च लिखत ।** 1x4=4

१. युष्मद् २. लता ३. पुस्तकम्

**6 वाक्यदोषान् परिहरत ।** 1x3=3

१. विप्रं गां यच्छति । २. वत्सः धेनोः सह गच्छति ।
३. गङ्गा हिमालयेन प्रवहति ।

**7 प्रयोगपरिवर्तनं कुरुत ।** 1x3=3

१. छात्रैः संस्कृतभाषा पठ्यते । २. सूदः अन्नं पचति ।
३. मित्रैः फलानि खाद्यते ।

**8 अन्यलिङ्गरूपाणि लिखत । (त्रयाणामेव)** 1x3=3

१. विद्यार्थी २. सेवकः ३. अग्रजः ४. लिखितवान्



पश्चादनुवर्तते

**9 कृदन्तपदं चित्वा नाम लिखत ।** 1x3=3

१. बालकः श्लोकं पठित्वा शालां गच्छति ।

२. सर्वे छात्राः एकत्र उपविश्य पठन्ति ।

३. पिता देवालयं गन्तुम् सिद्धः अभवत् ।

**10 वाक्यमेकं विवृणुत ।** 1x2=2

१. चिन्तासमं नास्ति शरीरशोषणम् ।

२. आत्मैवह्यात्मनो बन्धुः आत्मैवह्यात्मनो रिपुः ।

**11 मातृभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** 5

१. सर्वे बालाः गुरुं नमस्कुर्वन्ति ।

२. अस्माकं ग्रामे एकः सुन्दरः देवालयः अस्ति ।

३. नदीजलं मधुरं पानयोग्यं च भवति ।

४. पिता सप्ताहे एकवारं नगरोद्यानं गमिष्यति ।

५ पार्वती-परमेश्वरौ जगतः पितरौ ।

**12 संस्कृतभाषया अनुवादं कुरुत ।** 5

१. ನೀನು ಸಂಸ್ಕೃತವನ್ನು ಕಲಿಯಲು ಪ್ರಯತ್ನಿಸು.
You try to learn Sanskrit.

२. ಸೀತೆಯು ಹನುಮಂತನನ್ನು ನೋಡಿದಳು.
Sitha saw Hanuman.

३. ಅಧ್ಯಾಪಕರು ಕುರ್ಚಿಯ ಮೇಲೆ ಕುಳಿತರು.
The teacher sat on the chair.

४. ದೇವರು ವರವನ್ನು ಕೊಟ್ಟನು.
God gave a boon.

५. ಎಲ್ಲರೂ ಸುಖವಾಗಿರಲಿ.
Let all be happy.

* * * * *